# जैनतत्त्वज्ञानम् ।

—विजयधर्मसूरिः ।

सूरतनिवासि–श्रेष्ठिछगनलाल-
प्रेमचंदस्य भार्यायाः स्वर्ग-
तायाः 'पार्वती'नाम्न्याः
श्रेयोऽर्थमुपहारः
प्रति संख्या १०००

This essay was written in 1917 at the request of the secretary of the Bhandarkar Research Institute.

Printed by Ramchandra Yesu Shedge, at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay.

Published by
Sheth Premachandra Ratanji, for Yashovijaya-Granthamala, Bhavnagar.

॥ अर्हम् ॥

पूज्यपाद-शान्तमूर्त्तिश्रीवृद्धिचन्द्रगुरुभ्यो नमः ।

# जैनतत्त्वज्ञानम् ।

यच्चैतन्यमहोऽग्रतः प्रतिहताः सर्वेऽपि तेजस्विनो
यच्छक्तेः पुरतः समस्तभुवनस्थामाऽप्यकिञ्चित्करम् ।
विश्वैश्वर्यसुखाकरोऽपि च यदानन्दोदधौ बिन्दुवद्-
यश्चिन्ता-श्रुतिगोचरोऽपि नतरां प्रत्यक्षगम्यः पुनः ॥१॥

तस्मै जगद्विचित्राय जगदीशाय शम्भवे ।
ब्रह्मणे परमेशाय सद्भक्त्या विदधे नमः ॥ २ ॥

( युग्मम् )

अयं तावदारम्भः सङ्क्षेपेण परिदर्शयितुं जैनदर्शनतत्त्वम् । दर्शनानि च षट्। यदाहुः श्रीहरिभद्रसूरयः षड्दर्शनसमुच्चये—

"बौद्धं नैयायिकं साङ्ख्यं जैनं वैशेषिकं तथा ।
जैमिनीयं च नामानि दर्शनानाममून्यहो !" ॥

अस्य च जैनदर्शनस्य प्रकाशयिता परमात्मा रागद्वेषाद्यान्तररिपुजेतृत्वादन्वर्थक"जिन"नामधेयः । जिनोऽर्हन् स्याद्वादी तीर्थकर इति चानर्थान्तरम् । अत एव तत्प्रकाशितं दर्शनमपि जैनदर्शनमर्हत्प्रवचनं जैनशासनं स्याद्वाददृष्टिरनेकान्तवाद इत्याद्यभिधानैर्व्यपदिश्यते ।

अत्र दर्शने नव तत्त्वानि—पदार्थाः परिकीर्तिताः सन्ति । तानि

चामूनि । जीवोऽजीवः पुण्यं पापमाश्रवः संवरो निर्जरा बन्धो मोक्षश्चेति । यदाह जैनागमः श्रीसूत्रकृताङ्गसूत्रम्—

"[1]नत्थि जीवा अजीवा वा णेवं सन्नं निवेसए ।
अत्थि जीवा अजीवा वा एवं सन्नं निवेसए" ॥

तत्र चेतनालक्षणो जीवः । चैतन्यं ज्ञानमुपयोग इति हि पर्यायाः; सर्वत्रापि चेतनावत एव जीवस्य भावात्, चेतनाया जीवस्वरूपत्वात्, जडमात्रस्य चेतनाराहित्याच्च । अनेनैव जड-चेतनयोर्मुख्यत्वेन भेदसिद्धिः । ज्ञानरूपत्वेऽपि जीवस्य यन्न भवति सकलवस्तुविषयक आलोकस्तत्रेदं कारणं वेदितव्यम्—अनादिकालविपरिवर्तमानविविधकर्मसन्ततिभिः सामस्त्येन सम्बद्ध एव जीवः; एताभिश्च कर्मसन्ततिभिः समाच्छादितत्वान्न शक्नोति समस्तपदार्थान् साक्षात्कर्तुम् । तदुक्तम्[2]—

"न सर्वमपि वेत्त्येष प्राणी कर्मावृतो यथा ।
नार्कस्याऽभ्राभिभूतस्य प्रसरन्त्यभितः प्रभाः" ॥

तथा च कर्मप्रतिबन्धराहित्य एव सति निरभ्रदिनकर इव सर्वत्र प्रकाशमयो भवितुमर्हति जीवः ।

तत्र जीवा द्विविधाः, मुक्ताः संसारिणश्च । मुक्ताः सकलकर्मपरिक्षयेण सिद्धनिरञ्जनपरब्रह्मस्वरूपं प्राप्ताः । संसारिणः पुनः कर्मप्रतिबद्धाः । तेऽपि द्वेधा, स्थावरास्त्रसाश्च । तत्र स्थावराः पृथ्वीजलतेजोवायुवनस्पतिभेदभिन्नाः पञ्चधा । त्रसा द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियभेदैश्चतुर्धा । तत्र घर्षणच्छेदनादिभिर-

१ इत्यादिगाथाकदम्बकं द्वितीयश्रुतस्कन्धे पञ्चमाध्ययने । २ श्रीविनयविजयोपाध्यायकृतलोकप्रकाशे द्रव्यलोके द्वितीयसर्गे ७० ।

चैतन्यमप्राप्तानां पृथिव्यादीनां पञ्चानां त्वगिन्द्रियस्यैव सद्भावेनैकेन्द्रियत्वम् । एते चैकेन्द्रियाः प्रत्येकं द्वेधा, सूक्ष्मा बादराश्च । सूक्ष्माख्यनामकर्मोदयात् सूक्ष्माः । ते च सकललोकव्यापिनः । सकललोकाकाशस्तैर्जीवैः परिपूरित आस्त इत्यर्थः । बादराख्यनामकर्मोदयाद् बादराः । ते च प्रतिनियतस्थलवर्तिनो गम्याः । तत्र सूक्ष्मत्वं प्रतीतम् । बादरत्वं च स्थूलत्वम् । स्पर्शनरसनेन्द्रियाभ्यां द्वीन्द्रियाः कृमिपूतरकचन्दनकशङ्खकपर्दजलौकाप्रभृतयः । स्पर्शनरसनघ्राणैस्त्रीन्द्रिया कुन्थुमत्कुणयूकामत्कोटकेन्द्रगोपकादयः । स्पर्शनरसनघ्राणनेत्रैश्चतुरिन्द्रिया भ्रमरमक्षिकामशकवृश्चिकप्रमुखाः । स्पर्शनरसनघ्राणनेत्रश्रोत्रैः पञ्चेन्द्रियाश्चतुर्धा, तिर्यञ्चो मनुष्या नारका देवाश्च । तत्राऽद्या मीनमकरगजसारसहंसादयः । मनुष्याः प्रतीताः । नारका अधोलोकवर्तिनः । देवाः प्राधान्येनोर्ध्वलोकवर्तिनः । केचिद् भवनपत्यादयो देवा अधोलोकेऽपि । द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाणां त्रयाणां विकलेन्द्रियसंज्ञास्ति ।

एकेन्द्रिया विकलेन्द्रियाश्च विशिष्टमनोज्ञानरहितत्वेनासंज्ञिन उच्यन्ते; यस्मात् ते सम्मूर्च्छिमाः, गर्भजत्वाभावात् । देवा नारकाश्चोपपातजा उक्ताः । देवा हि देवशय्याभ्यन्तर उपपतन्ति । नारकाश्च वज्रकुड्यस्थवातायनसदृशनिष्कुटेषु । तिर्यक्षु च केचिद् गर्भजाः केचित् सम्मूर्च्छिमाश्च । मनुष्यास्तु गर्भजाः । ये तु श्लेष्मादिषु गर्भजमनुष्यसम्बन्धिषु चर्मचक्षुरदृश्या अन्तर्मुहूर्तभवस्थितिका मनुष्यजातीया उत्पद्यन्ते ते सम्मूर्च्छिमा एव । देवगतौ देवा देव्यश्च सन्ति, न कश्चिन्नपुंसकः । नारकाः सम्मूर्च्छिमाश्च नपुंसका एव । सम्मूर्च्छिमव्यतिरिक्ताश्च तिर्यञ्चो मनुष्याश्च पुंस्त्रीनपुंसकाः ।

---

१ सूक्ष्मबादरनामधेये कर्मणी वक्ष्यमाणाष्टविधकर्माऽन्तर्गतनामकर्मभेदौ ।

जीवानां शरीरं पञ्चधा—औदारिकं वैक्रियमाहारकं तैजसं कार्मणं च। तत्र प्रथमं मनुष्यपश्वादीनां सर्वेषां देवनारकव्यतिरिक्तानाम्। वैक्रियं च ह्रस्वदीर्घदृश्याऽदृश्यभूचरखेचरादिनानाविधरूपकरणसमर्थं भव(जन्म)स्वभावतो देवानां नारकाणां च। तथाविधशक्तिमहिम्ना मनुष्यादेरपि। आहारकं वपुश्चतुर्दशपूर्वविद्याबलेन सकलपदार्थान् समधिगच्छतां महापुरुषाणां परमर्षीणां भवति। एतेन च जीवन्मुक्तानां देहवतां सर्वज्ञपरमात्मनां पुरस्सरं प्रेषितेन सूक्ष्मार्थसन्देहापगमो भगवन्महर्द्धिदर्शनं च शक्यते कर्तुम्। तैजसकार्मणे च सर्वस्य संसारिजीवस्य भवतः। तैजसेन भुक्ताहारपरिपाकादिकार्यं भवति। कार्मणं शरीरं पुनः क्षीरनीरवद् अन्योन्यं परिश्लिष्टा जीवप्रदेशैः कर्मप्रदेशा एव। एतद्बलेन जीवस्य भवान्तरे गतिर्भवति।

तथाविधानां पृथिव्यादीनां सचेतनत्वं दुर्गममपि युक्ति-शास्त्रबलेन शक्यते प्रतिपत्तुम्। तत्र वनस्पतेस्तावत् सचेतनत्वं स्फुटत्वात् समर्थ्यते। मूले सिक्तेषु तरुषु यो रसः फलादिषु स्फुटतया परिदृश्यते, असौ नोच्छ्वासमन्तरेणोर्ध्वं प्रसर्तुमर्हति; अस्मदादिषूच्छ्वासे सत्येव रसप्रसर्पणोपलम्भात्। मृत्तिकादावुच्छ्वासाभावे रसप्रसर्पणाभावाच्च। तस्माद् रसप्रसर्पणेनाक्षिप्यमाण उच्छ्वासस्तरुषु निःसन्देहं सात्मकत्वं प्रसाधयति। एवं नृणामिव द्रूणामपि दोहदोत्पत्तिदर्शनात् संकोचविकासादिसंज्ञाबलाच्च वनस्पतीनां चेतनावत्त्वं सुश्रद्धानम्। पृथिव्यादीनामपि—सात्मिका पृथ्वी विद्रुमशिलादिरूपा, छिन्नाया अप्यस्याः पुनस्तत्स्थान एव समानजातीयाङ्कुरोत्थानाद्, अर्शोऽङ्कुरवत्। भौममम्भः सचेतनं क्षतभूसजातीयस्य स्वभावस्य सम्भवाद्, दर्दुरवत्।

१ दृष्टिवादो नाम शास्त्रमासीत्। तस्य चतुर्दशपूर्वात्मको विभागः।

नाभसमपि जलं सात्मकम्, अभ्रादिविकारे स्वतः सम्भूय पाताद्, मीनादिवत्। तेजः सात्मकम्, आहारोपादानात् तद्वृद्धौ विकारविशेषोपलब्धेश्च, नरवत्। सचेतनो वायुः, अन्यप्रेरितत्वे सति तिर्यग्गतिमत्त्वाद् गोवत्—इत्यादिप्रमाणबलेनागमवचनाच्च सचेतनतां कक्षीकुर्वन्ति धीराः।

ये तु जीवपदार्थमेव नेच्छन्ति तेषां बन्धमोक्षादिव्यवस्थानुपपत्तिः। इष्टापत्तौ जगद्वैचित्र्यं कस्माच्छक्येतोपपादयितुम्। एको राजा एको रङ्कः, कश्चिद् धनी कश्चिद् दरिद्रः, अन्यो नीरोगः परो रोगी, अपरः प्रज्ञावान् इतरोऽतिस्थूलमतिः; इत्याद्येवमनन्तविश्ववैचित्र्यं जीवपदार्थमपलेपुषामशक्यं साधयितुम्। आत्माभिसंश्लिष्टकर्मवैचित्र्यव्यतिरेकेण तदनुपपत्तेः। यदाह प्रथमकर्मग्रन्थे प्रथमगाथावृत्तौ श्रीमान् देवेन्द्रसूरिः—

"क्ष्माभृद्रङ्ककयोर्मनीषिजडयोः सद्रूपनीरूपयोः
श्रीमद्दुर्गतयोर्बलाबलवतोर्नीरोगरोगार्तयोः।
सौभाग्यासुभगत्वसङ्गमजुषोस्तुल्येऽपि नृत्वेऽन्तरं
यत्तत्कर्मनिबन्धनं तदपि नो जीवं विना युक्तिमत्" ॥१॥

ननु पृथिव्यादिभूतेभ्यो गुडपिष्टोदकादिभ्यो मदशक्तिरिव चेतना समुद्भवतीति मतं तदपि न विचारसहम्। अचेतनेभ्यो भूतेभ्यश्चेतनोत्पत्तिविरोधात्। अन्यथा घटादीनामपि सचेतनत्वप्रसक्तेः। पृथिव्यादिचतुष्टयस्य विशिष्टाभिसम्बन्धे सति चेतनाविर्भाव इति चेन्न; यो येषां न धर्मस्तेषां सत्यपि सम्बन्धे तद्धर्मप्रादुर्भावाभावात्। प्रत्यक्षसिद्धो ह्ययमर्थः। न हि तिलव्यतिरिक्तेभ्यः केभ्यश्चिदपि तैलप्रादुर्भावः। नास्ति च पृथिव्यादिः प्रत्येकं चेतनाधर्मवान्,

नातस्तत्सम्बन्धेऽपि चेतनोद्भवो युक्तिमान् । मदशक्तिदृष्टान्तोऽप्ययुक्तः; मदशक्तेरचेतनत्वेनाचेतनेभ्यः पिष्टोदकादिभ्य उत्पादस्य युक्तत्वेऽपि जडेभ्यो भूतेभ्यश्चैतन्यशक्त्युत्पादस्याऽसिद्धेः । एतेन देहात्मनोरैक्याभिमानोऽपि प्रत्युक्तः । मृतदेहे चेतनानुपलम्भात् । इन्द्रियाण्येवात्मेत्यपि न युक्तम्; चक्षुर्दृष्टस्यार्थस्य चक्षुर्व्यपगमे स्मरणानुपपत्तेः । न हि चक्षुर्दृष्टमर्थमन्यदिन्द्रियं क्षमते स्मर्तुम्; अन्यदृष्टस्यार्थस्यान्येन स्मरणायोगात् । तस्माद् इन्द्रियव्यतिरिक्तममुमेकं पदार्थमभ्युपगन्तुमर्हन्ति प्रेक्षावन्तः, यो हि ज्ञानस्वरूपो येन च प्रेरितानि करणानि स्वस्वविषयं परिच्छेत्तुं प्रभवन्ति, यः पुनरेकस्येन्द्रियस्य व्यपगमेऽपि तदुपलब्धमर्थं स्मृतिविषयीकरोति; स एव देहादिव्यतिरिक्तो जीवपदार्थः । उक्तं च न्यायदर्शने गौतमीये तृतीयाध्यायस्य प्रथमाह्निके प्रथमसूत्रम्—"दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्" ।

उक्तो जीवः । अथाजीवतत्त्वव्याख्यावसरः । अजीवस्य लक्षणं चेतनात्यन्ताभावः । जडोऽचेतनोऽजीव इति चानर्थान्तरम् । स च पञ्चधा—धर्मास्तिकायोऽधर्मास्तिकाय आकाशास्तिकायः पुद्गलास्तिकायः कालश्च । अत्रास्तिकायो नाम प्रदेशसमूहात्मकः । प्रदेशसमूहात्मकाः पदार्थाः पञ्चैव सन्ति—जीवो धर्मोऽधर्म आकाशं पुद्गलश्च । तत्र प्रत्येकं जीवस्यासंख्येयाः प्रदेशाः, एतावन्तश्च धर्मस्याऽधर्मस्य च । आकाशस्याऽनन्ताः प्रदेशाः । पुद्गलस्य पुनः संख्येया असंख्येया अनन्ताश्च । कालस्तु प्रदेशरहितः; अनागतस्य कालस्याऽनुत्पन्नत्वाद्, उत्पन्नस्य च विनष्टत्वाद्, वर्तमानस्य च समयस्य प्रदेशराहित्यात् । एवं च पञ्चास्तिकाया ज्ञेयाः । तदात्मकोऽयं लोकः । अत्र धर्माधर्मौ न पुण्यपापरूपौ शुभाशुभरूपौ जीवसम्बद्धाऽदृष्टरूपौ वा

प्रत्येतव्यौ, किन्तु लोक आकाशवद् व्यापकावेतन्नामानौ पदार्थौ जैनप्रवचने प्रज्ञप्तौ। तत्सद्भावे किं प्रमाणमिति चेद्, आगम एव प्रमाणम्। स्वीकुर्वते हि सर्वेऽपि दार्शनिकाः स्वस्वाभिमतमागमं प्रमाणम्। न हि स्वर्गनरकाद्यतीन्द्रियपदार्थाभ्युपगम आगममन्तरेण वर्तते किञ्चिच्छरणम्। स्वर्गाद्यनुमापकान्यप्यनुमानप्रमाणानि न स्वातन्त्र्येण चित्ताश्वासहेतवः, किन्त्वागमप्रमाणस्य सकाशाल्लब्धप्रसादान्येव भवन्ति। ननु जैनदर्शनादन्यत्र न क्वापि दर्शने धर्माधर्मौ पदार्थौ स्वीचक्राते, ततः कथमागममात्रेण तत्राश्वाससम्भवः?। युक्तिं हि काञ्चिदाचक्षीतेति चेत्, तर्ह्यवधेयमिदम्। गतिलक्षणस्तावद् धर्मास्तिकायः। प्रमाणं चात्र गतिपरिणतयोर्जीवपुद्गलयोरलोके गमनविरहान्यथानुपपत्तिः। न चालोकाभिमुख्यविरहादेव तत्राऽगतिरिति वक्तव्यम्; सिद्ध–परमाण्वादीनामलोकाभिमुखत्वात्। न च क्रियाविशेषे देशविशेषस्य हेतुत्वादलोकदेशस्य गत्यहेतुत्वेनैवोपपत्तौ व्यर्था धर्माधर्मपरिकल्पनेति युक्तं वक्तुम्; सहकारिण एव तत्र विशेषकत्वात्। सहकारिणमन्तरेण केवलदेशत्वरूपेण हेतुताकल्पनायां मानाभावात्। स्थितिलक्षणोऽधर्मास्तिकायः। तत्रापि स्थितिपरिणतयोर्जीवपुद्गलयोरलोके स्थितिविरहान्यथानुपपत्तिः प्रमाणम्। अयं भावः। स्वभावतः संचरतां जीवपुद्गलानां पानीयमिव मीनानां धर्मास्तिकायः साहायकं करोति। अधर्मास्तिकायः पुनस्तेषामेव, मीनानां स्थलवत् पान्थानां छायावद् वा स्थितौ सहायो भवति। इदं तात्पर्यम्—गतिस्थितिपरिणामे सत्येवैतौ सहायौ; अन्यथा जीवादीनां सदा गति–स्थितिप्रसङ्गात्; एतयोर्लोकव्यापिनोः सदा सत्त्वात्।

इदं चात्र ध्येयम्। अर्हत्प्रवचने लोकोऽलोकश्चेति द्वौ प्रज्ञप्तौ।

तत्र लोकश्चतुर्दशरज्ज्वात्मको[1] जीवाजीवैश्च संव्याप्तः। लोके पुनस्त्रयो विभागाः। ऊर्ध्वलोकोऽधोलोकस्तिर्यग्लोकश्च। ऊर्ध्वाधोलोकयोर्देवनारकनिवासः प्रागुक्त एव। तिर्यग्लोकः पुनरयं यत्राऽस्मदादयो वर्तन्ते। भारतवर्षादिक्षेत्रसमूहात्मको योजनशतसहस्रविष्कम्भो वृत्तो यस्य नाभौ मेरुर्वर्तते, एवम्भूतश्च जम्बूद्वीपः। असौ तद्द्विगुणविष्कम्भेण लवणसमुद्रेण परिवेष्टितः। एवंरीत्याऽसंख्येया द्वीपा उत्तरोत्तरसमुद्रेण परिवेष्टिताः। ते असंख्येया द्वीप-समुद्रा द्वि-द्विगुणविष्कम्भा वलयाकृतयो वेदितव्याः। अयं सर्वोऽपि तिर्यग्लोकः। इत्येवमुक्तो लोकः। अलोकः पुनः केवलाकाशात्मकः। अलोके हि जीवपुद्गला धर्माधर्मौ च न सन्ति, किन्तु केवलमाकाशमेव। एवं च धर्माधर्मानभ्युपगमे लोकालोकव्यवस्था न स्यात्; जीवपुद्गलानां सर्वत्राऽप्यस्खलद्गत्यादिसम्भवेनालोकत्वेनाभिमतस्यापि लोकत्वप्रसंगप्राप्तेः। धर्माधर्मसद्भावे तु यत्रैव लोके तौ स्तः, तत्रैव पुद्गलानां गत्यादिसम्भवात् तदन्यत्र जीवादिगमनाभावेन केवलाकाशरूपत्वप्राप्तेः सुतरामलोकत्वसिद्धिः। अलोकश्चानन्तः। सर्वव्यापि सर्वाधारः स्वप्रतिष्ठमनन्तप्रदेशमाकाशं प्रसिद्धमेव[2]। दिक् तु नार्थो-

---

१ लोकस्य चतुर्दश भागाः क्रियन्ते, ते प्रत्येकं–रज्जुनाम्नोच्यन्ते।

२ लोकसम्बद्ध आकाशो लोकाकाशः। अलोकसम्बद्ध आकाशोऽलोकाकाशः। एवं चैकमप्याकाशं धर्मास्तिकायादिसम्बन्धसत्त्वासत्त्वाभ्यां द्वेधा विभज्यते। आकाशं खल्ववकाशदम्। अलोके पुनर्जीवपुद्गलानामभावादवकाशदायित्वगुणश्चरितार्थो न भवत्याकाशस्य। न च तद्गुणस्याऽचारितार्थ्येऽलोकाकाशस्याकाशत्वं भज्येत। अलोकाकाशो ह्यवकाशं दातुं सर्वदा स्थित एव, परं तत्रावकाशग्राहक एव कश्चिन्न स्यात् तर्ह्यस्य कोऽपराधः?। यदि जीवादिपदार्था अलोकेऽभविष्यन्, अवश्यमसौ तेषामदास्यताऽवकाशम्। अतोऽवकाशग्राहकाभावकारणेनाचरितार्थेनाप्यवकाशदत्वगुणेनालोकाकाशस्य सुस्थमाकाशत्वम्।

न्तरमाकाशात् । वर्तनादिलक्षणः कालः । वर्तना च नवपुराणादिपरिणामः । तत्र चार्धतृतीयद्वीपसमुद्रान्तर्वर्ति[1] कालद्रव्यं हेतुः ।

स्पर्शरसगन्धवर्णवन्तः पुद्गलाः । ते द्विधा । अणवः स्कन्धाश्च । तत्र स्कन्धात् पृथग्भूता अबद्धा अप्रदेशाः परमाणवः । द्वौ प्रदेशावारभ्य संख्येया असंख्येया यावदनन्ताश्च प्रदेशा यत्र सन्ति ते द्विप्रदेशिकाः संख्येयप्रदेशिका असंख्येयप्रदेशिका यावदनन्तप्रदेशिकाः स्कन्धा उच्यन्ते । अत्रेदं ज्ञेयम् । यो घटपटादिस्कन्धेषु सम्बद्धः परमोऽणुः स प्रदेश उच्यते । स्कन्धात् पृथग्भूतस्तु स एव परमाणुः । जीवादीनां[2] प्रदेशास्तु जीवादिभ्योऽभिन्ना न पृथग् भवितुमर्हन्ति । यथा पृथग्भूतः केवलः परमाणुः स्वतन्त्रद्रव्यमेवाथ च स्कन्धसम्बन्धे सति प्रदेशशब्देन व्यपदिश्यते तथा जीवादिप्रदेशाः स्वतन्त्रतया द्रव्याणि न । अत एव पुद्गलप्रदेशेभ्यो जीवादिप्रदेशानां विजातीयत्वं विज्ञेयम् । अत एव च जीवादिप्रदेशाः परस्परं सम्बद्धा एकीभूता इव सर्वदाऽवतिष्ठन्ते ।

उक्तोऽजीवपदार्थः । वस्तुत एतौ द्वावेव पदार्थौ । नाभ्यामतिरिच्यते कश्चिदर्थः । ये च धर्माधर्माकाशकालपुद्गलजीवा उक्ताः, तानि षड्द्रव्याण्यपि पूर्वोक्तरीत्या जीवाजीवान्तर्भूतान्येव । यान्यपि पुण्यादितत्त्वानि दर्शयिष्यन्ते तान्यपि यथासम्भवं जीवाजीवयोरन्तर्भवन्ति न पृथग्भवितुमर्हन्ति । ज्ञानादिरूपादिगुणानामुत्क्षेपणादिकर्मणां च

---

१ जम्बूद्वीपः, तद्वेष्टको लवणोदधिः, तद्वेष्टको धातकीखण्डः, तत्परिवेष्टकः कालोदधिः, तद्वेष्टकस्य पुष्करावर्तस्याऽर्धभागः । एवं च द्वौ समुद्रौ, सार्धौ द्वौ द्वीपौ; तथा चार्धस्तृतीयो द्वीपो ययोस्तावर्धतृतीयौ द्वीपौ तौ च समुद्रौ चार्धतृतीयद्वीपसमुद्रौ। इदमेव च नरक्षेत्रं पञ्चचत्वारिंशल्लक्षयोजनप्रमाणम् ।

२ आदिपदाद् धर्माधर्माकाशाः ।

कथञ्चिदभेदेन जीवाजीवद्रव्यान्न सर्वथा पृथग्भावः साधीयान् । सामान्यविशेषावपि वस्तुस्वरूपावेव । समवायसम्बन्धोऽपि नैयायिकवैशेषिकाभिमतो न द्रव्याद् भेदेन स्थातुमर्हति । अभावं तु भावात्मकमाचक्षत एवार्हताः । यदाहुस्तार्किकसार्वभौमाः श्रीयशोविजयगणयो न्यायालोके[1]——'एवमप्यभावस्याधिकरणात्मत्वसिद्धिः' । एवं च स्थितेऽपि द्वौ पदार्थाविति सिद्धान्ते गोबलीवर्दन्यायेन विशेषप्रतिपत्त्यर्थं संसारनैर्गुण्योपदर्शनद्वारेण निःश्रेयसमार्गसम्मुखीकरणार्थं च युक्त एव पृथगुपन्यासः पुण्यादितत्त्वानाम् ।

तत्र पुण्यं स्वर्गैश्वर्यादिप्रशस्तफलसम्पादनप्रगुणाः प्रशस्ता जीवाभिसंसृष्टाः कर्मवर्गणाः[2] । तद्विपरीतं पापम् । आश्रूयते[3]ऽनेन कर्मलक्षणमुदकं जीवरूपतडागे इत्याश्रवः । कर्मोपादानहेतुरित्यर्थः । कर्मोपादानं च मिथ्यात्वाविरतिकषाययोगैर्भवति । तत्र मिथ्यात्वं वस्तुस्वरूपाद्विपरीतप्रतिभासः । हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो न विरतिरविरतिः । कषायाः क्रोधमानमायालोभाः । मनोवाक्कायव्यापारा योगाः । शुभा योगाः पुण्यस्य, अशुभा योगाः पापस्य हेतवोऽवसेयाः । संवरः पूर्वोक्तानां मिथ्यात्वादीनां कर्मोपादानहेतूनां निरोधः । अयमर्थः । यथा सरोवरोऽप्रतिरुद्धैर्द्वारैः प्रविष्टेन जलप्रवाहेण परिपूर्यते, प्रतिरुद्धेषु तु द्वारेषु मनागपि न तत्र जलप्रवेशः; यथा वा यानपात्रे रन्ध्रद्वारेण जलं प्रविशति, कृते तु रन्ध्रपिधाने न तत्प्रवेशः; एवंरीत्या आश्रवद्वारैरप्रतिरुद्धैः कर्मद्रव्यप्रवेश आत्मनि भवति, सम्यग्दर्शनविरतिक्षमादिगुप्तिभिश्च क्रमेण पूर्वोक्तानां मिथ्यात्वादीनामाश्रवद्वाराणां

---

१ मुद्रितपुस्तके दशमपत्रे प्रथमपृष्ठ उपान्त्यपङ्क्तौ ।

२ वर्गणा समुदायः ।

३ आगम्यत आनीयत इति यावत् ।

प्रतिरोधे कृते न मनागप्यात्मनि कर्मद्रव्यं प्रविशति । तथा हि । सम्यग्दर्शनेन पूर्वोक्तलक्षणमिथ्यात्वाद्विपरीतलक्षणेन मिथ्यात्वं निगृह्यते । हिंसादिविरत्या च तदविरतिः प्रतिरुध्यते । क्षमया क्रोधो मृदुत्वेन मान आर्जवभावेन माया संतोषेण च लोभः पराभूयते । मनोगुप्त्या मनोयोगनिग्रहः । वाग्गुप्त्या वाग्योगनिरोधः । कायगुप्त्या च काययोगप्रतिरोधः ।

उक्तावाश्रवसंवरौ । निर्जरा तपसा कर्मनिर्जरणम् । देशतः कर्मोपक्षयः । अथ बन्धतत्त्वम् । अञ्जनचूर्णपूर्णसमुद्गकवद् निरन्तरं पुद्गलनिचिते लोके कर्मयोग्यपुद्गलैरात्मनः क्षीरनीरवद् वह्न्यःपिण्डवद् वान्योन्याभिसंश्लेषात्मकः सम्बन्धो बन्धः । स चतुर्धा—प्रकृतिः स्थितिरनुभागः प्रदेशश्च । तत्र प्रकृतिरष्टधा । ज्ञानावरणं दर्शनावरणं वेदनीयं मोहनीयमायुष्कं नाम गोत्रमन्तरायं च । तत्र चक्षुरावारकपटादिवद् ज्ञानावारकं कर्म ज्ञानावरणम् । एतस्यैव कर्मणो महिम्ना विदुषोऽपि कदाचित् स्मृतिभ्रंशादयो जायन्ते । यथा यथा परिपुष्टं भवत्येतत्कर्म, तथा तथा ज्ञानमात्रा ह्रासमापद्यते । यथा यथा चेदं कर्म शिथिलीभवति, तथा तथा ज्ञानप्रकाशो विशेषतः प्रसरति । सामस्त्येन चास्य कर्मणः परिक्षये सकलपदार्थप्रकाशः प्रादुर्भवति । दर्शनावारकं कर्म दर्शनावरणम् । एतत्कर्मबलेन निद्रादयो भवन्ति । अन्धत्वबधिरत्वादिकमप्येतन्निबन्धनम् । सुखासुखजननस्वभावं कर्म वेदनीयम् । अत एव तत् सातवेदनीयमसातवेदनीयमिति द्वेधा । मदिरावद् मोहयमानं कर्म मोहनीयम् । यथा मदिरापानाद् विमूढीभूतः पुमांस्तत्त्वविवेकविकलो भवति, तथा मोहनीयकर्मणापि प्राणी सदसत्स्वरूपपरिज्ञानशून्यो भवति । एतद् द्विधा—दर्शनमोहनीयं चा-

रित्रमोहनीयं च। प्रथमं त्रेधा मिथ्यात्वं सम्यक्त्वं मिश्रं च। तत्र प्रथमे द्वे प्रागुक्ते। मिश्रं पुनर्गुणस्थानक्रमारोहे श्रीरत्नशेखरसूरिराह—

"जात्यन्तरसमुद्भूतिर्वडवाखरयोर्यथा।
गुडदध्नोः समायोगे रसभेदान्तरं यथा" ॥
"तथा धर्मद्वये[1] श्रद्धा जायते समबुद्धितः।
मिश्रोऽसौ भण्यते तस्माद्भावो जात्यन्तरात्मकः" ॥

अथवा नालिकेरद्वीपवासिनो मोदकादाविव सत्यमार्गे न रागो न च द्वेष इत्येवम्भूतो योऽध्यवसायः, तद् मिश्रमोहनीयमित्यप्याहुः। अयमत्र भावार्थः—मिथ्यात्वपुद्गलकदम्बकं मदनकोद्रवन्यायेन परिशोधितं सद् विकाराजनकत्वेन शुद्धं सम्यक्त्वमुच्यते। तदेव मिथ्यात्वपुद्गलकदम्बकं किञ्चिद्विकारजनकत्वेनार्धविशुद्धं सद् मिश्रमुच्यते। यदा तु सर्वथाऽप्यशुद्धं तत्, तदा मिथ्यात्वमिति। चारित्रमोहनीयं पुनः क्रोधादिकषाय—हास्यादिनोकषायरूपम्। तत्र क्रोधादिकषायाश्चत्वारः प्रागुक्ताः। हास्यादयस्तु नव—हास्यं रतिररतिर्भयं शोको जुगुप्सा पुरुषवेदः स्त्रीवेदो नपुंसकवेदश्च। एते कषायसहचारित्वान्नोकषाया उच्यन्ते, नोशब्दस्य साहचर्यवचनत्वात्। कषायोद्दीपनाद्वा नोकषायाः। आयुष्कर्म सुरनरतिर्यङ्नरकायुर्भेदाच्चतुर्विधम्। नामकर्म समासतो द्विधा—शुभमशुभं च; व्यासतस्तु नानाविधम्। यथा चित्रकृद् विविधं चित्रं निर्माति तथा नामकर्मापि अयं मनुष्योऽयं बलवानयं पशुरसौ निर्बलः स रूपवानेष कुरूपोऽसौ सुस्वरः स दुःस्वर इत्याद्यनेकप्रकारं विपरिणामं जीवेषूपजनयति। गोत्रं कर्म द्वेधा। उच्चगोत्रं नीचगोत्रं च। उच्चनीचगोत्रव्यवहारः सर्वत्र प्रकारान्तरेण

---

१ धर्मद्वय इति सत्यतत्त्वेऽसत्यतत्त्वे च।

सम्भवति। अन्तरायं कर्म पञ्चधा। तत्र सत्यपि देये वस्तुनि, आगते च गुणवति पात्रे जानन्नपि दानफलं यदुदयान्नोत्सहते दातुं तद्दानान्तरायम्। तथा विशिष्टेऽपि दातरि विद्यमानेऽपि च देये वस्तुनि याञ्चाकुशलोऽपि याचको न लभते यदुदयात्, तल्लाभान्तरायम्। यस्योदयात् सत्यपि विभवादौ सम्पद्यमानेऽपि चाहारमाल्यादौ विरतिहीनोऽपि न भुङ्क्ते तद् भोगान्तरायम्। सदपि वस्त्राभरणादि नालमुपभोक्तुं यस्योदयात् तदुपभोगान्तरायम्। यदुदयाच्च बलवान्नीरोगोऽपि तृणकुब्जीकरणेऽप्यशक्तः स्यात् तद्वीर्यान्तरायम्।

अथ केन प्रकारेण पूर्वोक्तं कर्माष्टकं बध्यते तदुपदर्श्यते। ज्ञानस्य ज्ञानवतां ज्ञानसाधनानां च दर्शनस्य दर्शनवतां दर्शनसाधनानां च मात्सर्याऽन्तरायोपघातादिकरणेन ज्ञानावरणदर्शनावरणयोर्बन्धः। दुःखशोकतापाक्रन्दनवधपरिदेवनान्यात्मपरोभयस्थान्यसातवेदनीयस्य कर्मणो बन्धहेतवः। भूतानुकम्पादानक्षान्त्यादयः सातवेदनीयस्य। परमर्षीणां धर्मशास्त्रस्य देवतादीनां चावर्णवादो दर्शनमोहनीयस्य। कषायोदयात् तीव्रसंक्लिष्टपरिणामश्चारित्रमोहनीयस्य। बह्वारम्भपरिग्रहत्वं नारकस्यायुषः। माया तैर्यग्योनस्य। अल्पारम्भपरिग्रहत्वं स्वभावमार्दवार्जवं च मानुषायुषः। सरागसंयमदेशसंयमबालतपआदयो देवायुषः। मनोवाक्काययोगवक्रत्वपरप्रतारणादयोऽशुभस्य नाम्नः। विपरीतं शुभनाम्नः। परनिन्दात्मश्लाघासदसद्गुणाच्छाद-

---

१ क्रियते, कषायादिदोषैः कर्मद्रव्यमात्मना बध्यते इति कर्म। तच्च पुद्गलरूपम्। अत एव निगडादिनेव कर्मणा बध्यते जीवः। नैयायिकास्तु जीवस्य गुणः कर्म, सौगताः वासनास्वरूपं कर्म, कापिलाः पुनः प्रकृतिविकारः कर्म। ब्रह्मवादिनश्चाविद्यास्वभावं कर्म, इति परिभाषन्ते। परन्तु पूर्वोक्ताऽनुभवेन पौद्गलिकरूपमेव कर्म, इति सिद्धान्त आर्हतानाम्।

नोद्भावने च नीचगोत्रस्य । विपरीताश्चोच्चगोत्रस्य । विघ्नकरणमन्तरायस्य ।

उक्तः प्रकृतिबन्धः । स्थितिबन्धस्तु आत्मगृहीतानां कर्मपुद्गलानां स्थितिकालनियमनम् । आद्यानां तिसृणां कर्मप्रकृतीनामन्तरायस्य चोत्कृष्टा स्थितिस्त्रिंशत्सागरोपमकोटीकोट्यः[1][2] । सप्ततिसागरोपमकोटीकोट्यो मोहनीयस्य । नामगोत्रयोर्विंशतिः सागरोपमकोटीकोट्यः । आयुष्कस्य त्रयस्त्रिंशत्सागरोपमाणि । जघन्या स्थितिः पुनर्वेदनीयस्य द्वादश मुहूर्ताः[3] । नामगोत्रयोरष्टौ । शेषाणामन्तर्मुहूर्तम् । कर्मपुद्गलानामेव शुभोऽशुभो वा घात्यघाती वा यो रसः स एवानुभागबन्धो वा रसबन्धो वा । कर्मपुद्गलानामेव स्थितिरसनिरपेक्षं दलिकसंख्याप्राधान्येनैव यद् ग्रहणमसौ प्रदेशबन्धः। प्रकृतिस्थितिरसप्रदेशाश्च मोदकदृष्टान्तेन भाव्याः । तद्यथा । मोदको वातपित्तकफान्यतमविनाशिद्रव्योत्पन्नस्तदन्यतमं यथोपशमयति, एवं ज्ञानावरणादिकर्मणोऽपि ज्ञानाच्छादनस्वभावा प्रकृतिः । एवं शेषमप्यूह्यम् । स एव मोदको यथा मासं पक्षमेकदिनमपि वा तिष्ठति, तथैव कर्मणोऽपि ज्ञानावरणादेस्त्रिंशत्सागरोपमकोटीकोट्यादिः स्थितिः । रसः पुनर्मोदके स्निग्धमधुरादिरूप एकगुणो द्विगुणस्त्रिगुणोऽपि वा भवति, तथैव कर्मणोऽप्येकस्थानिकद्विस्थानिकत्रिस्थानिकादिरूपः । प्रदेशा यथा मोदका

---

१ सागरोपमोऽतिदीर्घतमः कालविशेषः । अस्य स्वरूपं पञ्चमकर्मग्रन्थे देवेन्द्रसूरिनिर्मिते द्रष्टव्यम् ।

२ कोट्या गुणिता कोटी कोटीकोटी ।

३ अतिसूक्ष्मतमः कालः समयशब्देनोच्यते, यस्मात् सूक्ष्मसमयो नास्ति । नवभ्यः समयेभ्य एकसमयोनमुहूर्तान्तं यावदन्तर्मुहूर्तं भवति ।

एकप्रसृतिप्रमाणाः प्रसृतिद्वय—त्रय—सेतिकादिप्रमाणा वा भवन्ति, तथा कर्मण्यप्यल्पबहुबहुतमादिरूपा वेदितव्याः ।

नवमं तत्त्वं मोक्षः । सकलकर्मक्षयो मोक्षः । स च केवलज्ञाने सत्येव । केवलज्ञानं च ज्ञानावरणदर्शनावरणान्तरायाणां मोहनीयकर्मप्रक्षयादनु प्रक्षये जाते प्रादुर्भवति । एतत्कर्मचतुष्काच्छेषं कर्मचतुष्कमघातिशब्देनोच्यते । अघातिकर्माणि भवाधारत्वाद्भवोपग्राहिशब्देन व्यपदिष्टानि । सत्स्वेतेषु हि भवरूपः प्रासादोऽवतिष्ठते । एषां च प्रक्षये स प्रासादस्तत्क्षणमेव भज्यते ।

केवलज्ञानिनो द्वेधा—तीर्थङ्कराः सामान्यकेवलिनश्च । येषां तीर्थङ्करनामकर्मोदयो नास्ति ते केवलिनः सामान्यकेवलिन उच्यन्ते । ये तु तीर्थङ्करनामकर्मोदययुक्ताः, ते तीर्थङ्करा ईश्वराः परमेश्वराः । तीर्थं प्रवचनं तत्प्रकाशकत्वात् तीर्थङ्करत्वम् ; तीर्थं साधुसाध्वीश्रावकश्राविकालक्षणश्चतुर्विधः सङ्घः, तत्स्थापकत्वाद्वा तीर्थङ्करत्वम् । तीर्थङ्कराश्च तीर्थङ्करनामकर्मोदयमहिम्ना परमातिशयसाम्राज्यचमत्कृतसकलसुरासुरनरेन्द्रयोगीन्द्राः देवेन्द्रैरहमहमिकया परिषेव्यमाणा धर्मदेशनाद्वारेण जगज्जनाननुगृह्णन्ति । एतेषां परमात्मनां शिष्यीभूयैतेषामुपदेशमवलम्ब्य ये महाप्राज्ञा विशिष्टशक्तिसम्पन्नाः परमपुण्यभाजो द्वादशाङ्गीं ग्रथ्नन्ति, ते गणधरा उच्यन्ते । अङ्गानि चामूनि—आचाराङ्गं सूत्रकृताङ्गं स्थानाङ्गं समवायाङ्गं भगवती ज्ञातधर्मकथोपासकदशाऽन्तकृद्दशाऽनुत्तरोपपातिकदशा प्रश्नव्याकरणं विपाको दृष्टिवादश्चेति । तत्र दृष्टिवादो व्यवच्छिन्नः । शेषाणि चाङ्गानि तत्कालापेक्षया सङ्क्षिप्तानि वर्तन्ते सम्प्रति । अन्यान्यप्युपाङ्गादीनि बहून्यागमशास्त्राणि गणधरशिष्य—प्रशिष्यगुम्फितानि सन्ति वर्तमाने ।

स च केवली भगवान् आयुःसमाप्तौ सत्यामघातिकर्मप्रक्षय एव

देहपञ्जरान्निर्गत्य समश्रेण्योर्ध्वं याति यावल्लोकान्तमेकसमयेन; तथा-स्वाभाव्यात्। लोकान्तात् परतो धर्मास्तिकायाभावान्न गमनसम्भवः। लोकान्तादधःपातोऽपि गुरुत्वाभावादसम्भवः। प्रेरकाभावाच्च तिर्यग्गतिरप्यसम्भविनी। ऊर्ध्वमधस्तिर्यग्गमनं हि जीवानां कर्मजन्यम्। क्षीणसकलकर्मणां पूर्णब्रह्मणां सिद्धानां तु स्वभावत एवोर्ध्वगतिः। ते सिद्धाः कुत्र समवस्थिताः? इत्यत्राह भगवानुमास्वातिस्तत्त्वार्थ-सूत्रपर्यन्ते——

"मनोज्ञा सुरभिस्तन्वी पुण्या परमभासुरा।
प्राग्भारा नाम वसुधा लोकमूर्ध्नि व्यवस्थिता"॥
"नृक्षेत्रतुल्यविष्कम्भा सितच्छत्रनिभा शुभा।
ऊर्ध्वं तस्याः क्षितेः सिद्धा लोकान्ते समवस्थिताः"॥

घातिकर्मचतुष्कप्रक्षये क्रमतश्चत्वारोऽक्षय्याः सदावस्थायिनो गुणाः सम्पद्यन्ते। तथा हि। ज्ञानावरणविध्वंसे केवलज्ञानं दर्शनावरणविनाशे केवलदर्शनं मोहनीयनिर्घाते परमोज्ज्वलं चारित्रम् अन्तरायप्रक्षये अनन्तवीर्यम्। एते गुणास्तु जीवन्मुक्तानां देहवतां प्रत्यक्षीकारनिर्देश्यानां परमात्मनां घातिकर्मप्रक्षयसमुत्थाः सम्भवन्त्येव। आयुःसमाप्तौ चाघातिकर्मप्रक्षयजन्या अन्ये पुनरनन्तसुखादिगुणा अमीषां प्रादुर्भवन्ति। मुक्तीभूतानां भगवतां परब्रह्मणां देहेन्द्रियाद्यभावाद् ऐन्द्रियकसुखासम्भवेऽप्यात्मस्वभावं सुखमाविर्भवति। तस्यानन्तभागेऽपि सकलभुवनेन्द्राणामैश्वर्यसुखमहाकरो नोपपद्यते। अकर्मकीभूतः परमात्मा न पुनः कर्मवानर्हति भवितुम्। न हि क्षीरात् समुद्धृतमाज्यं पुनः क्षीरतां व्रजति। यथा च रसेन्द्रेण नीताः शातकुम्भतां धातवो न पुनरावृत्तये भवन्ति, एवमकर्मकीभूतो निरञ्जनः सिद्धो न भवेत् पुनः कथमपि कर्मवान्। *एतेनेदमपि प्रज्ञप्तं*

भवति—मुक्तिं प्राप्य न पुनरधोऽवतारः सम्भवति । आह च महर्षि-रुमास्वातिर्वाचकमुख्यस्तत्त्वार्थसूत्रपर्यन्ते—

"दग्धे बीजे यथाऽत्यन्तं प्रादुर्भवति नाङ्कुरः ।
कर्मबीजे तथा दग्धे न रोहति भवाङ्कुरः" ॥

परमात्मानो हि परमवीतरागाः, न तस्मादेषां संसारेण किमपि प्रयोजनं येन पुनः संसारमाविशेयुरिति जैनसिद्धान्तः । इदमपि जैनसिद्धान्ताभिमतम्—कर्मक्षयस्य करणेन भवतीश्वरः, न पुनर्नित्य-मुक्तः कश्चिदेकः सनातन ईश्वरः । उक्तं हि सम्मतिप्रकरणवृत्तौ[1] न्याय-चक्रवर्तिना श्रीमदभयदेवसूरिणा— "तन्न रागादिक्लेशविगमः स्वभा-वत एवेश्वरस्येति युक्तम्" । उपायबलेन ह्युपेयसिद्धिः, उपायव्य-तिरेकेणोपेयसिद्धेरसम्भवात्; तथाचेश्वरत्वमपि यदि नोपायसिद्धं तर्हि सर्वेषामपि तत्सम्भवः स्याद् न वा कस्यापि । उक्तं हि सौगतेन धर्मकीर्तिनाऽपि—

"नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् ।
अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः" ॥

अत एव जैना ईश्वरं प्रतिपद्यमानाः सेवमाना उपासीना ध्यान-गोचरीकुर्वाणा अपि नाचक्षते जगत्कर्तारम् । तेषां ह्ययमेवाऽभिप्रा-यः—परमवीतरागस्येश्वरस्य न किञ्चित् जगत्सृष्टौ प्रयोजनं सम्भ वति; परमकृतार्थत्वात् । न च निष्प्रयोजनस्य जगत्सृष्टिचेष्टोपपत्ति-मती । ईश्वरस्यानादितया स्वीकर्तॄणां जगतोऽप्यनादित्वेन स्वीकारे न किञ्चिद् दूषणापातः । प्रतिक्षणं विपरिणममानमपि जगद् द्रव्य-शक्तितः सनातनमेव; समूलनाशायोगात् । मुक्तेरनादित्वेन च मुक्ति-

---

१ मुद्रितपुस्तक १२१ पृष्ठे ।

स्थानामप्यनादित्वात् सुतरामीश्वरस्याऽनादित्वसिद्धिर्जैनप्रवचनेऽपि । मुक्तेरनादित्वादेव च संसारस्याऽप्यनादित्वं सुतरां सिध्यति ।

ईश्वरस्य वीतरागत्वेन निग्रहानुग्रहकारित्वाभावेऽपि तदुपासना परमावश्यकी । शुद्धालम्बनेन मनसः शुद्धिभावेन सर्वार्थसिद्धेः । यादृशं ह्यालम्बनं तथारूप उपरागो मनस्युपजायते । यथा चाग्निं सेवमानस्य शीतार्तिरुपशाम्यति तद्वद्वीतरागं परमेश्वरमुपासीनस्य रागार्तिरुपशाम्यति ।

अन्यच्च आर्हतानामयं मूलमन्त्रः— सर्वे खलु भावाः स्याद्वादमुद्राङ्किताः; स्याद्वादमन्तरेण वस्तुस्वरूपानुपपत्तेः । स्याद्वादो हि सापेक्षतयैकस्मिन् धर्मिणि सदसत्त्वनित्यानित्यत्वाद्यनेकधर्माभ्युपगमः। सर्वं हि वस्तु स्वरूपेण सत् पररूपेण चासत्, कटक—कुण्डलादिपर्यायेण चानित्यं स्वर्ण—मृत्तिकादिमूलद्रव्येण च नित्यं सर्वेषां प्रतीतिपथमारोहति । इदं च तत्त्वं श्रीहरिभद्रसूरिपादैरनेकान्तजयपताकायां बहु विवेचितमस्तीति तद्विषयिणी जिज्ञासा तत एव सम्यगुपशाम्यति ।

अधिकजिज्ञासुमहाशयैर्जैनतत्त्वज्ञानविषये कर्मग्रन्थ—तत्त्वार्थसूत्र—लोकप्रकाश—विशेषावश्यकादयो ग्रन्था अवलोकनीयाः । इह त्वेतावदेव वक्तुमुचितं मत्वा विरमति—

विजयधर्मसूरिः ।

